## शमि धातोः सञ्ज्ञायाम् । (१४/२०२८)

शम्युपपदे [1]धातुमात्रात् सञ्ज्ञायां विषये अच्प्रत्ययो भवति । शङ्करः । शंभवः । [2]शंवदः । धातुग्रहणं किं यावता धातोः इति वर्तत एव ? शमिसञ्ज्ञायामिति[3] सिद्धे धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम् (म. भा. २.१००) । शङ्करा [4]नाम परिव्राजिका । शङ्करा नाम शकुनिका । तच्छीला च ॥

## अधिकरणे शेतेः । (१५/२०२९)

सुपि इति [5]सम्बध्यते । शेतेर्धातोरधिकरणे सुबन्त उपपदे अच् प्रत्ययो भवति । खे शेते खशयः । [6]गर्तशयः ।

[२३८] पार्श्वादिषूपसङ्ख्यानम् । (म.भा.२.१००)

[7]पार्श्वाभ्यां शेते पार्श्वशयः । [8]उदरशयः । [9]पृष्ठशयः ।

[२३९] दिग्धसहपूर्वाच्च । (म. भा. २.१००)

दिग्धेन सह शेते दिग्धसहशयः[10] ।

[२४०] उत्तानादिषु कर्तृषु । (म. भा. २.१००)

उत्तानः शेते उत्तानशयः । अवमूर्धा शेते अवमूर्धशयः ।

[२४१] गिरौ डश्छन्दसि । (म. भा. २. १००)

गिरौ शेते गिरिशः[11] (मै. २.९.२) ॥

## चरेष्टः । (१६/२०३०)

अधिकरणे इति वर्तते । चरेर्धातोरधिकरणे सुबन्त उपपदे टप्रत्ययो भवति । [12]कुरुषु चरति[13] कुरुचरः । मद्रचरः । कुरुचरी । [14]मद्रचरी । प्रत्ययान्तरकरणं ङीबर्थम् ॥

## भिक्षासेनादायेषु च । (१७/२०३१)

अनधिकरणार्थः आरम्भः । भिक्षा सेना आदाय इत्येतेषु उपपदेषु [15]चरेः धातोः टप्रत्ययो भवति । भिक्षाचरः । सेनाचरः । [16]आदायचरः ॥

---

1. धातोः फ. 2. शम्बः फ, नास्ति अ. 3. इति नास्ति ब. फ. 4. नाम नास्ति ब. 5. वर्तते अ. फ, नास्ति ब. 6. गर्तशयः नास्ति अ. 7. पार्श्वं उदर पृष्ठ उत्तान अपमूर्धन् इति पार्श्वादिः इत्यधिकम् ड. 8. उरःशयः फ. 9. पृष्ठशयः नास्ति अ. 10. लिप्तांगः एव शेते इत्यर्थः फ.ह. 11. छन्दसि इति किम् ? गिरिशयः इत्यधिकम् क. 12. कुरुषु चरति नास्ति फ. 13. इति इत्यधिकम् ब. 14. मद्रचरी नास्ति फ. 15. चरतेः ब. क. फ. 16. आदाय चरति इति इत्यधिकम् ड.